क्रं ४२ सं.

कामगारांचेपोवाडे - पृ. १३.

अपूर्ण.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशाय नमः अथ काम्यवृषोत्सर्गप्रयोगः अथ वृषलक्षणं जीववत्सायाः पय
स्विन्याः पुत्रं त्रिहायनं द्विहायनं एकहायनं वा नीलं बहुरूपिणं कृष्णं पिंगलं लोहितं
श्वेतं वा एकवर्णं अनेकवर्णं वा अव्यंगं जीवन्मातृकं यथासंभवं वा यूथं छादय
ति तं वृषमुत्सृजेत् लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः श्वेतः खुरविषा
णाभ्यां स नीलो वृष उच्यते ॥ चरणास्तु मुखं पुच्छं यस्य श्वेतानि गोपतेः ला
क्षारससवर्णश्च स नीलो वृष उच्यते ॥ वृषोत्सर्गकालः कार्तिक्यां पौर्ण
मास्यां माघ्यां वैशाख्यां आश्वयुज्यां वा अष्टकासु चवोत्सृजेत् अथ काम्य
वृषोत्सर्गप्रयोगः भट्टचरणोक्तिमतान्तरसहितामनुसृत्य पदार्थान्वदा
मः प्रागेव सुमुहूर्ते रुद्राय महादेवाय जुष्टो वर्धस्वेति शिरस्त आ पुच्छात्क्री
हियवमतीभिरद्भिर्वृषं प्रोक्ष्य वर्धयेत् यावत्स दंतो भवति सेचनसम
र्थो वा ततो ग्रामाद्बहिः प्राच्यामुदीच्यां वा दिशि इष्टदेशे ध्वजादि सं

प्रागुदीच्यां

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

का०वृ०गी
॥१॥

युक्तं षोडशस्तंभमंडपं छायामात्रं वा कृत्वा तदैशानदेशे षष्ठहस्तां चतुर्हस्तां वा वे
दिं कृत्वा ग्रहेन सहो मातापितॄणामुद्धारकामनया फलांतरकामनया वा संकल्प्य गण
पतिकुलदेवतापूजनं स्वस्तिपुण्याहवाचनं कृत्वा मातृकापूजनसमये वत्सलगत
अे तं दुःपुंछेषु ॐ गणपतिं स्थापयामि ॐ गौरीं स्थापयामीत्येवं प्रणवादि
(२) नामभिः कुलदेवतांतानां षोडशानामेव स्थापनादि पूजनांतं ततो वृद्धिश्रा
द्धमाचार्यवरणे च मंडपपश्चिमे तद्देवताप्रतिष्ठापनं अत्र ग्रहमखोऽपि कृता
कृतः पूर्वदिने वृषस्य वत्सतरीणां च तत्सूणां द्वयोरेकस्य वा मांगलिक
स्नानं ब्राम्हणभोजनं कृत्वा स्वयं हविष्यं भुंजीत उपवासं कुर्यात् ततः
श्वोभूते शिवालयं गत्वा संकल्पपूर्वकदीपोद्बोधनविधानादि दक्षिणाप्रदा
नांतं कार्तिकापुराणोक्तं शिवाराधनं कृत्वा चतुर्हस्तविताना च्छादितायां ॥१॥
वेद्यां स्थंडिलं विधाय वृषोत्सर्गांगभूतं होमं करिष्ये इति संकल्प्य अ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

ग्निस्थापनांतं स्वगृह्योक्तविधिना स्वयमाचार्यो वा कुर्यात् ततोग्नेरीशान्यां
पंचगोमातरः पूज्याः ॐ नंदां स्थापयामि ॐ सुमनसां स्थाप० सुभद्रां० सुशीलां०
ॐ सुरभिं० तदग्रे महाघोरित्यादिविधिना स्थापिते पंचरत्नान्विते कलश
शीताम्रादिमये पूर्णपात्रे कृतान्युत्तारण हेम रौद्र प्रतिमायां रौद्रमंत्रेणावा
हनादिभी रुद्रं संपूज्य तत्कलशस्य रुद्रानुमंत्रणार्थं ऋत्विजं योजयेत् ।
ततः सवत्सतरीकं वृषं प्रांचं श्रीहि यवमतीभिरद्भिः षिंचेत् आपोहिष्ठे
ति नवर्चस्य सूक्तस्यांबरीषः सिंधुद्वीप आपो गायत्री पंचमी वर्धमा
ना सप्तमी प्रतिष्ठा त्ये द्वे अनुष्टुभौ वृषवत्सतर्यभिषेके वि० कयान
इति तिसृणां गौतमो वामदेव इंद्रो गायत्री अभीषुण इति पादनिचृ
त् वृषवत्सत० ततो वस्त्रगंधाक्षतमाल्यैरलंकृत्या न्वाधानं चक्षु

धर्मेणहोमः शौनकमते परिशिष्टमते उपस्तरणानंतरं सर्वंचरुंअवदान रु
काम्यवृ० द्रीआज्येनेत्यंते रुद्रं चरुणासोमं पायसेन इंद्रंयावकेनेति शौनकमते परिशिष्टमते
शेषद्रव्य तूष्णीं निर्वाप प्रोक्षणे आज्यभागांते ॐ रुद्रायस्वाहा ॐ सोमायस्वाहा
॥२॥ ॐ इंद्रायस्वाहा इति हविरुद्रयस्यावदानं रूपेणावदायाभिघार्य हरायमृडा
यशर्वायशिवायभवायमहादेवायोग्रायभीमायपशुपतेरुद्रायशंकराये
शानायस्वाहेतिवा उग्रायेवा दिषप्नाम भीरेववारुद्रायस्वाहेतिवाजुहु
यात् ततोवदान धर्मेण सोमायस्वाहेति पायसं हुत्वा तथैव पूर्वेण स्वा
हेति यावकंहुत्वा चतस्त्रु दिक्षु चतस्त्रः कुशस्तूनासु निधाय तासुहू
विःशेषेण बलिंहरेत् यास्ते पूर्वस्यां दिशि रुद्रसेनास्ताभ्य एनं नमस्ते ॥२॥
अस्तुमामाहिंसीरिति दक्षिणस्यां प्रतीच्यां मुदीच्यामित्येवमादि
शेत् दर्भस्तंभे स्तूपेभ्यः गपिलः कटः स्तूनात तोहविस्त्वप्र शेषेणेन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

स्विष्टकृत पूर्णपात्र निनयनांते निनीताद्भिः स्वस्य वृषस्य च मार्जनं संस्था
जपे होमेनोपस्थानं अस्मिन्काले वा वृषाभिषेकः ततः सुवासिनीभिः कृ
तनीराजनं वृषं वेदेरुत्तरतः प्रादक्षिण्येन नीत्वा प्राङ्मुखं वृषं स्वयमुद
ङ्मुखो मधुपर्केण यथागृह्यं संपूज्य गंधेन रक्तपीतसितकृष्णपुष्पैर्वा
सोभ्यां हेमवैडुर्याभ्यां घंटिका घंटाभ्यामन्यैश्चाविविधैर्भूषणैरलंकृ
त्य छत्रोपानत्कांस्यभाजनादि यथाशक्ति समर्प्य हरिद्राकुंकुमादिना
संपूज्यां कन्यार्थे दक्षिऊरौ वामे [illegible] चिन्हं कृत्वा वृषेन्यासं कुर्यात् इषे
त्वोर्जेत्वो वायवः स्थोपायवः स्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय क
र्मणे इति मूर्ध्नि इमा रुद्राय तवसे इति दक्षिण चिन्हे नमस्ते रुद्र मन्य
व इति वाम चिन्हे सहस्राणि सहस्रशा इति ककुदे विभ्राड् बृहत्पिब

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कास्यवृषो० तुरितिदक्षिणनेत्रे त्र्यंबकंयजामहइतिवामनेत्रे मानस्तोकइतिनासिकायां अ
॥३॥ वतत्यधनुस्त्वमितिमुखे नीलग्रीवाःशितिकंठाइतिकंठे मर्माणितेवर्मणे
तिबाहुमध्ये समिधाग्निंदुवस्यतेतिपार्श्वयोः नमोवःकिरिकेभ्यइतिहृदये
(५) हिरण्यगर्भइतिनाभौ मीढुष्टमेतिकट्यां मानोमहांतमित्यूर्वोः उदु
त्यंजातवेदसमितिजंघयोः इमारुद्रायस्थिरधन्वनइतिजान्वोः रक्षोह
णंवाजिनमितिगुदे रव्यास्तेरव्यंशपथइतिलिंगे ऋषभंमासमाना
नामितिपृष्ठे एवंन्यासंकृत्वा ...ः पश्चिमभागेवेदिसमीपेस्वगृह्यो
कलशदान
क्तविधिनावृषायवत्सतरीदानंकुर्यात् तद्यथा देशकालौसंकीर्त्यमम
समस्तपूर्वजानांनिरतिशयस्थानंदब्रह्मलोकावाप्त्यर्थंरुद्रस्वरूपिणे ॥३॥
वृषायवत्सतरीदानंकरिष्ये इतिसंकल्प्य वत्सतर्यैस्तारयंतु

(4A)

पुंण्यं वर्धतामिति वृषवत्सरे जलसेचनादिकार्यं ततो मम समस्तेत्यादि
रुद्रस्वरूपिणे वृषाय यथाशक्त्यलंकृतां वत्सतरीं तुभ्यमहं संप्रददे अ
नेन वत्सतरीदानेन वृषस्वरूपी रुद्रः प्रीयतामिति उक्त्वा अस्य
नीलोद्वाहस्य प्रतिष्ठासंसिद्ध्यर्थं इदं हिरंण्यं दक्षिणात्वेन संप्रददे
इति सुवर्णपरिमितं न्यूनं वा हिरण्यं दद्यात् ततो रुद्रकलशोदके
न वृषवत्सतरीणामभिषेकः आपोहिष्ठेति तिसृभिर्ऋग्भिः १ समुद्रज्येष्ठा ४
इमं मे गंगे २ कयानश्चित्र ३ सहस्राक्षं शतधारमृषिभिः पावमानं
कृतं तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते भगं ते वरुणो रा
जा भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो विदुः
यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ललाटे कर्णयोरक्ष्णो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॰वृ॰ रूपस्त्वद्धं तु सर्वदा सुरास्त्वामिति पौराणमंत्रैः एवमभिषिच्य वृषकर्णे जपेत् धर्मस्त्वं वृषरूपेण जगदानंदकारकः अष्टमूर्तेरधिष्ठानमतः पाहि
॥९॥ सनातन ततः तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि तंनो वृषः प्र
(९) चोदयात् इति पुष्पैः संपूज्यानयागायत्र्या ॥ वृषभं मासमया॰ गवामि
ति च वृषं संप्रार्थयेत् ततो गावश्च गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः गावो मे हृदये नित्यं गवां मध्ये वसाम्यहं पंचगावः समुत्पन्ना मथ्यमाने महोदधौ तासां मध्ये तु या नंदा तस्यै देव्यै नमो नमः
या लक्ष्मीः सर्वदेवानां या च देवेष्ववस्थिता धेनुरूपेण सा देवी मम पापं व्यपोहतु अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः तुभ्यं
चैता मया दत्ता पत्न्यः सर्वा मनोरमाः इति ततो वृषमान्वारभ्य आ ॥९॥

(5A)

चार्योऽजादिना विप्रादि होमं कुर्यात् ततोऽग्नेः पूर्वत उदङ्मुखः
वृषपुच्छं वत्सतरीपुच्छं स्नात्वा पात्रे मेऽर्चयित्वा यवातिल मिश्रोदकैः देव
र्षिपितृतर्पणं कार्यं यजमानेन देशकालौ संकीर्त्य दुर्गतिगतानां
पितॄणामुद्धारार्थं आत्मना निर्दिष्टाय वृषवत्सतरीपुच्छेषु तर्पण
महं करिष्ये इति संकल्प्य नित्यतर्पणवद्देवर्षिपितृतर्पणं कृत्वा
वाराह ब्रह्माण्डपुराणमंत्रैस्तर्पणं कुर्यात् ब्रह्माद्या देवताः स
र्वे ऋषयो मुनयस्तथा अनुयाताः धाताश्च मातरश्चण्डिकास्त
था॥ दिक्पाला लोकपालाश्च महादेवादि देवताः ते सर्वे तृप्ति
मायांतु नीलपुच्छे सुतर्पिताः विश्वेदेवास्तथादित्याः साध्याश्चै
व मरुद्गणाः क्षेत्रपीठोपपीठानि नदा नद्यश्च सागराः ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

०द्द॰ पाताळेनागपत्न्यश्च नागाश्चैव सपर्वताः पिशाचागुह्यकाः प्रेतागंध
॥५॥ र्वगणराक्षसाः पृथिव्यापश्च तेजश्च वायुराकाशमेवच दिविभुव्यंत
(6) रिक्षेचयेचपाताळवासिनः शिवः शिवास्तथाविष्णुः सिध्दिर्ळक्ष्मीः
सरस्वती तपोधनाश्च भगवानर्थ्यकः परमेश्वरः क्षेत्रौषधि
ळतावृक्षावनस्पत्यधिदेवताः कपिलः शेषनागश्च तक्षकोनंत
एवच अन्येजळचराजीवास्त्वसंख्यातास्त्वनेकशः चतुर्दशाय
माश्चैवयेचान्येयेचकिंकराः सर्वेपियक्षराजानोपक्षिणः पशवस्त
था स्वेदजोद्भिज्जजाजीवाश्चांडजाश्च जरायुजाः अन्येपिवनजी
वाश्च दिवानिशिविहारिणः अजागोमहिषारूपायेचान्येपशवस्तथा
शांतिदाशुभदास्तेस्युर्नीरेणानेनतर्पिताः आब्रह्मस्तंबपर्यंतंयेच्या ॥५॥
न्येगोत्रिणास्तथा तेसर्वेतृप्तिमायांतुनीळपुच्छेसुतर्पिताः सर्प

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(6A)

व्याघ्रहताये च शृंगिदंष्ट्रिनिःशादिभिः अपुत्रा अक्रिया ये च हीनधर्मवि
वर्जिताः आमगर्भामृताये च शास्त्रघातमृताश्च ये संस्काररहिताये
च रौरवादिषुगामिनः आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः तृ
प्यंतु पितरः सर्वे मातृमातामहादयः अतीतकुळकोटीनां सप्तद्वी
पनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तु तिळोदकं पितृवं
शे मृता ये च मातृवंशे च ये मृताः गुरुश्वशुरबंधूनां ये चान्ये बां
धवाः स्मृताः ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः क्रिया
लोपगता ये च जात्यंधाः पंगवस्तथा विरूपा आमगर्भाश्च
ज्ञाताज्ञाताः कुले मम ते पिबंतु मया दत्तं वृषपुच्छेतिळोदकं
ये बांधवाबांधवाश्च ये न्यजन्मनि बांधवाः ते सर्वे तृप्तिमायांतु
वृषपुच्छेतिळोदकैः वृक्षत्वं च गता ये च तृणगुल्मलतास्थिताः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

का० वृ० यातनासु च घोरासु जातीषु विविधासु च ॥ नरकेषु च घोरेषु पतिता ये
॥ ६ ॥ स्वकर्मणा देवत्वं मानुषत्वं च तिर्यक्त्वं च गताश्च ये कृमिकीटपतंगत्वं
(7) गता ये च स्वकर्मभिः तेषामुध्दरणार्थाय जलमेतद्ददाम्यहं आब्रम्ह
स्तंबपर्यंतं जलैस्तृप्यंतु सर्वदा २३ अथ यजमानः पुत्रकामश्चेत्त
दा देशकालसंकीर्तन पूर्वकं पुत्रकामो वृषपुछोदकस्नानं करिष्ये
इतिसंकल्प्य स्नानं कुर्यात् ततः परिहितवाससो प्राङ्मुखौ दं
पती वस्त्रपीठे उपवेशयित्वा तयोरुपरि सप्तधान्यफलान्वित पु
छान्येकीकृत्य पुरुषांतरेण धारयित्वा उदङ्मुख आचार्यो वंशपात्र
गतोदकेन दंपती अभिषिंचेत् समुद्रज्येष्ठा इत्यादिभिर्वारुणै
श्च मंत्रैः ततो वस्त्रांतराणि परिधाय वेद्यां वृषदक्षिणपस्युरे

Joint project of the Rajwade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

पायसादिसंभवद्रव्येण प्राचीनावीती दक्षिणाभिमुखः सव्यंजान्वाच्यय
जमानः पित्रादीनुद्दिश्य श्राद्धपूर्वकं पिंडदानं तन्मात्रं वा कुर्यात् मात्रादि
भ्यो मातामहादिभ्यश्च पृथग्दद्यादिति केचित् तत्र संकल्पः एवंगुण
मम समस्त पितॄणां ब्रह्मलोकप्राप्त्यर्थं आत्मनश्च संतानाविच्छेदार्थं
षखुरे सश्राद्धं पिंडदानं करिष्ये इति संकल्प्य महालयवद्देशोद्दिष्टदेव
तोद्देशेनापि कृत्वा पौराणमंत्रैः पिंडदानं कुर्यात् पितृवंशे मृता ये च मा
तृवंशे तथैव च गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः ये मे
कुले लुप्तपिंडाः पुत्रदारविवर्जिताः क्रियालोपगताश्चैव जात्यं
धाः पंगवस्तथा विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम खुर
दत्तेन पिंडेन तृप्तायांतु परां गतिं कृष्णयोनिगता ये च तिर्यग्यो

फा० शु० निर्गताश्च ये पंगुत्वं च गताये वै ये च मूकत्वमागताः आब्रह्मणो ये मम वं
शजाता मातुस्तथा वंशभवा मदीयाः वंशद्वये ये मम दासभृत्ता भृत्या
॥८॥ स्तथैवाश्रितसेवकाश्च मित्राणि सख्यः पशवश्च वृक्षाद्दृष्टाश्च स्पृष्टा
(४) श्च कृतोपकाराः जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिंडमहं ददामि
अजातदंता ये केचिद्ये च गर्भे प्रपीडिताः तेषामुद्धरणार्थाय इमं पिंडं
ददाम्यहं बंधुवर्गाश्च ये केचिन्नाम गोत्रविवर्जिताः स्वगोत्रे पर
गोत्रे वा तेभ्यः पिं० उद्बंधनमृता ये च विषशस्त्रहताश्च ये शृंगि
भिर्दंष्ट्रिभिर्वा पि तेभ्यः पिं० अग्निदाहे मृता ये च सिंहव्याघ्रहता
श्च ये आत्मोपघातिनो ये च तेभ्यः पिं० अग्निदग्धाश्च ये केचि ॥८॥
न्नाग्निदग्धास्तथा परे विद्युच्चौरहता ये च तेभ्यः पिंडं ददाम्यहं

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai. "

(8A)

रौरवे चांधतामिस्रे कालसूत्रे च ये गताः तेषामुध्दरणार्थाय इमं पिंडं ददाम्यहं
यातनासंस्थिता ये च नीताश्चयमकिंकरैः तेषामुध्दरणा० पशुयोनिगता
ये च पक्षीकीटसरीसृपाः अथवा वृक्षयोनिगैतौसैचे तेभ्यः पिंडं ददाम्यहं स्या
अन्येर्दुर्मरणे ये च क्षुधया तृषया मृताः भूतप्रेतपिशाचाद्या तेभ्यः पिं०
दिव्यंतरिक्षभूमिस्था पितरो बांधवादयः ते सर्वे तृप्तिमायांतु पिंडदाने
न सर्वदा आत्यंतर सहस्त्राणि भ्रमंते स्वेन कर्मणा मानुष्यं दुर्लभं ते
षां तेभ्यः पिंडं० ये केचित्प्रेतरूपेण वर्तते पितरो मम ते सर्वे तृप्तिमा
यांतु पिंडदानेन सर्वदा एवं पिंडदानं कृत्वा स्वगृह्योक्तविधिना पिंडदा
न शेषं समाप्य रुषरवुरे पिंडदानं संपूर्णमस्त्विति ब्राम्हणान्प्रतिब्रूयात्
ते संपूर्णमस्त्विति प्रतिब्रूयुः पिंडोध्दारणां ते जातवेदसः प्रादक्षि

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

का॰वृ॰ ण्येन परितोऽजान्विकीर्य वृषवत्सतरीः प्रादक्षिण्येनाग्नेः पूर्वतो नीत्वा वृष
दक्षिणोरो त्रिशूलेन वामे चक्रेण चांकयित्वाऽङ्कृतं प्रांचं उत्सृजेत् देशकालौ सं
॥८॥ कीर्त्य मम पितॄणामुद्धारणपूर्वकं ब्रह्मलोकावाप्तये स्वसंतानाविच्छेदाय वृष
(९) मुत्सृजामीति संकल्पपूर्वकमुत्सृजेत् महेसपुष्पोदकेनांजलिना वृषपुच्छं धार
यित्वा हराय परमेशाय एषमया दत्तो नमम इति जलप्रक्षेपपूर्वकं हस्तमुक्षिप्यो
र्ध्वं देत् हराय मृडाय शर्वाय शिवाय भवाय महादेवायोग्राय भीमाय पशु
पतये शिवाय शंकराय ईशानायेति द्वादशनामोच्चारणपूर्वकं वा व्रजतः पृष्ठे
हस्तं दत्वा मंत्रौ वदेत् एतं युवानं परिवो ददामि तेन क्रीडंतीश्चरत प्रियेण
मा नः शाप्त जनुषा सुभगा रायस्पोषेण समिषा मदेम शांता पृथिवी शिव॰ ॥ ॥८॥
शांतिः ३ सर्वतो व्रजस्य तु ष्का ऋषभं मा समानानामिति सूक्तेनोपति

(9A)

छेत ऋषभंमेतिसूक्तस्य ऋषभऋषिः ऋषभोदेवता अनुष्टुप्छंदः अंत्यामहापंक्तिः ऋषभोपस्थाने वि० ॐ ऋषभंमासमानानां० ५ इत्युपस्थाय ततोदक्षपूर्वाभिमुखंकृत्वा कद्रुद्रायेतिनवर्चस्यसूक्तस्य घोरःकण्वो रुद्रोगायत्री अंत्यानुष्टुप् जपेविनियोगः कद्रुद्रायेतिसूक्तजपांतेगोभिःसहजरडंपिबत्तृणानिभक्षयथेष्टं पूर्थं पर्यट स्वेतिवदेत् अथदक्षिणाभिमुखंकृत्वा इमारुद्रायतवसइतिएकादशर्चस्यसूक्तस्य कुत्सो रुद्रोजगती अंत्येत्रिष्टुभौ जपेवि० इमारुद्रायतवसइतिसूक्तजपांतेगोभिःसहेत्यादिपूर्ववत् ततः प्रत्यङ्मुखंकृत्वा आतेपितरितिपंचदशर्चस्यसूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप् जपेवि० आतेपितरितिसूक्तजपांतेगोभिःसहेत्यादिपूर्ववत् अथोदङ्मुखंकृत्वा इमारुद्रायस्थिरधन्वनइतिचतु

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project of the

कं चस्यसूक्तस्य वसिष्ठो रुद्रो जगती अंत्या त्रिष्टुप् जपे. इमा रुद्राय स्थिरधन्वने गिर इति सूक्तं जपांते गोभिः सहेत्यादि पूर्ववत् इति शौनकमते परिशिष्टमते तु वृषेण त्रिरग्निं प्रदक्षिणा कारयित्वोक्तरीत्या स्वस्वत्यागं विधाय कद्रुद्रायेमा रुद्राया तेपितरिमा रुद्राय स्थिरधन्वन इति सूक्तैश्चतस्रो दिश उपस्थायैतं युवानं शांतेति मंत्रा[illegible]यं [illegible] भंमेति सूक्तेन च वत्सतरीभिः सह वृषं प्रांचं वोत्सृजेदिति विशेषः ततो गच्छति वृषेनुगच्छन्स्तुवीत वृषो हि भगवान्धर्मो मुक्तार्थैव हि सिक्ता इमाः स्वारूप्यं चैव सायुज्यं सांनिध्यं च सलोकतां इमाः सुरूपाः पत्न्यस्तु च तव सत्वगोपते कल्पिताः क्रीडनार्थं च त्वया सार्धं व्रजंति माः धर्मोसि त्वं चतुष्पादः स्तुतो ॥१॥ वत्सतरीस्त्विमाः चतुर्णां पोषणार्थाय मया त्वत्सृष्टास्तपास्तह दे

धाम्य॰ ॥१॥ १०।

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(16A)

यतानांपितॄणांचमनुष्याणांचपोषकः भूतानांतृप्तिजननात्सत्यस्माद्धृ
प्रजंत्विमाः नमोब्रह्मण्यदेवाय भूतादिपितृपोषकः त्वयिमुक्तेमयालोका
ममसंतुनिरामयाः खुराग्रक्षेपणैःसर्वंममपापंव्यपोहतु पितरस्तृप्ति
मायांतुखुराग्रजैस्तुसीकरैः ये ब्रांधि संतिपापभानोनरकंयांतुतेभयं
येत्वांरक्षंति धर्मिष्ठाःस्वर्गेतेनिवसंतुवै त्वदर्पकृतो ब्राह्मणैर्नदीकु
लविहारिणे अक्षयाःसंतुमेलोकाः पूर्वजानांतुसौरभाः धनंसं
तानमारोग्यंबांधवानांविशोकता ततःप्रदक्षिणीकृत्यवृषंत
मभिवादयेत् तत्रमंत्रः धारणाद्धर्मइत्याहुर्धर्मेणविधृताः
प्रजाः चरत्वंधर्मरूपेणवृषवत्सतरीयुतः धर्मस्त्वंवृषरूपे
णब्रह्मणानिर्मितःपुरा ततोपसर्गप्रभावेनमामुद्धरभवार्ण

"A Joint Project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

काम्यव्र० पात् एवं नमस्कृत्य मंत्रवाद्यघोषेणा सीमांतं नीत्वा दक्षिणस्कंधेन प्रेरय
॥१०॥ न्विसृजेत् वृषवत्सतरीणां सर्वमकृकारास्याचार्यो गृह्णीयात् सच नवा
छ्यो गावश्च न दोह्याः नवाह्यो सौ न च क्षीरं पातव्यं केनचिन्हवामि
(११) ति वचनात् ततआगत्य चरणं क्षालनमाचमनादि विधाय स्थापित
देवताभ्यः उत्तरपूजां विधाय उत्तिष्ठेति मंत्रेण यांतु देवगणा इति वि
सृज्य देवप्रतिमां आचार्याय दद्यात् रुद्रकलशाः सोपस्कारो रुद्र
जापकाय देयः ततो रुद्रस्थालीपाक व्रीहीसंबंधितुषफलीकर
णान्यग्नौ प्रक्षस्य प्रायश्चित्त होमादिशेषं समापयेत् केचित्त्वि
ष्टकृदंतैव वेछंति ततोंकनकगर्भं सोदकुंभं हिरण्यं यथाशक्ति दत्वा ॥१०॥
स्य वृषोत्सर्गाख्य कर्मणः परिपूर्णतासिध्यर्थं शतं शिवव्रतधरा

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

(11A)

ब्राह्मणान् यथोपपन्नेन भोजयिष्ये इति संकल्प्य । तत्र दशकोपंचाशत्
त्तदशको पंचविंशतिं यथाशक्ति वेति दृष्टा: शांखायनभाष्येकोमे
कुर्याल्लक्षादि भोज्यं तु एकादशशतानि वा अथवा तु शतं भोज्यं दद्यादंन
मवारितं उत्सृष्टे वृषभे दद्याच्च तु दशपदानि च शय्यां सोपस्करां दद्या
द्दद्याद्दानानि वै दश चतुर्दश तथा विप्रा: सभार्या वेदपारगा:
उमामहेश्वर प्रीत्यै परिधाप्या स्वशक्तित: भुवं सस्यवतीं दद्याद्धेनुं
गऽसंयुतां दद्याच्च सप्तधान्यानि कपिलां गां सवत्सिकां आचा
र्यं पूजयेच्चैव सपत्नीकं विचक्षण इति ततोस्य वृषोत्सर्गस्य प्रतिष्ठा
सिद्ध्यर्थं आचार्यपूजनं करिष्ये इति संकल्प्य यथाशक्ति वस्त्रालंका
र चंदन माल्यादिभिराचार्यमभ्यर्चतिऽनुदकुंभंकं षोडशपरिमि

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

काम्यवृ० तं हेमं वृषयोजनार्थं रूपं वस्त्रयुग्मं च दद्यात् ततो यथाशक्ति ब्राह्मणे दक्षि
॥११॥ णां दत्वा नानानामगोत्रेभ्यश्च भूयसीं दत्वाज्यपूर्णकांस्यपात्रे आज्यं
(१२) तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं आज्यं सुराणामाहारमाज्ये लोकाः
प्रतिष्ठिताः इत्यवलोक्य ब्राह्मणाय प्रतिपाद्य न्यूनातिरिक्तं संपूर्ण
मस्त्विति प्रार्थयेत् संपूर्णमस्त्विति ब्राह्मणाः प्रतिब्रूयुः इदानीं कलशो
दकेनाभिषेक इति केचित् ब्राह्मणाशिष आदाय सर्वाणि वा अस्य
नामधेयानि सर्वाः सेनाः सर्वाण्युच्यमानानीति विच्चिंस इंतातो
यंजपन्न्टहानेत्य ब्राह्मणान्भोजयित्वा यथाशक्ति हिरण्य वस्त्र दानेन तो
स्तोषयित्वा स्वस्तिं भवंतो ब्रुवंतु इत्युक्ते स्वस्तीति ब्रूयुः तद्दिने दीन ॥११॥
दुःखिता नामन्निर्वाप्याः वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(12A)

मितमहंभत्त्या समारक्षतु सर्वत: धर्मतस्त्वसंभूति: स्वाहात्वं च विभा
व षरूपेण या देवि सर्वकामफलप्रदा भव अदितिर्देवमातस्त्वं वेद
त थेश्वरी धेनुरूपेण सा देवि मम पापं व्यपोहतु गावो मे अग्रत: सं
वो मे संतु पृष्ठत: गावो मे हृदये नित्यं गवां मध्ये वसाम्यहं या ल
सर्वदेवानां या च देवे व्यवस्थिता धेनुरूपेण सा देवि मम पापं व्यपो
पंच गाव: समुत्पन्ना मथ्यमाने महोदधौ तासां मध्ये तु या नंदा त
स्यै नमो नम: धर्मं देहि यशो देहि पुत्रान् देहि सुसंपद: एकोत्तर
पैव कुलानां तारयस्व मे रुद्रमाता मया दत्ता पत्न्यस्त्वं वृषोत्तम ग
वां तारणार्थाय पर्यटस्व यथासुखं स्वस्तिं भवंतो ब्रुवंतु इत्युक्त्वा
सीति ब्रुयु: तद्दिने दीनदु:खितानामनिवारिते भोजनं देयं ।।

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(13)

धरार्पणं कृत्वा बंधुभिः सह भुंजीतेति इत्याश्वलायनीय वृषोत्सर्गप्रयोगः

नोक्त प्रयोगे वृषवत्सतरीति जोदकपान समये पितृतृप्तिध्यानवि

न पृथक्तर्पणं गोमिथुनविधिनाद दक्षिणांतर निवृत्तिः प्रयोगा

पूर्वमेव वत्सतरीणां दोहनं अंते पयसि ब्राम्हण भोजनार्थं पाय

सेण विधानात् शेषं यथा सूत्र पौराणं गोपसंहारेण कार्यमिति

शीय प्रयोगः इति स्मृत्यंतर वृषोत्सर्ग प्रयोगः समाप्तः वृषोत्स

लः कार्तिकी माघी वैशाख्या श्वयुजी वा पौर्णमास्यष्टकासु

र्वयोपराग संक्रांत्यादयः प्रयोगांते कांस्य पात्रस्थिताज्ये मुखं

र स्मृतिकौस्तुभे अत्र त्से शौनकोक्ते च वृषोत्सर्गे निर्दिष्ट ॥१२॥

वक पायसा लक्ष्करिविलय अपणस्य हेमाद्युदाहृत कार्तिका

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

णोक्त वृषोत्सर्गनिर्देशः कर्मैक्यप्रतीतेः कालिकापुराणोक्त
उपसंहारोपि समर्थैः कार्यः यथोक्तो हेमाद्रौ कालिकापुराणे
त्पऽदऽ भरव्यः श्वेतांघ्रिश्चंद्रमस्तकः सुभ्रूर्युवाऽको हि ताम्रक्षो वृ
नीऽउच्यते वृषभं को हि तं पिंगं सुश्वेतं वा विमोचयेत् चतु
कऽधर्मोऽवृषोयं हरवाहनः २ तमुद्दिश्य समोक्तव्यो विधि
न मे शृणु सोपवासः शुचिः स्नात्वा गत्वा चैव हराऽयं वितानं
ब्द्वो ध्य विन्यसेच्छिव मूर्धनि गव्येन शुभगंधेन स्नपनं कार
र्वं ४ पलैस्तु पंचविंशाद्भिः सर्पिषा यत्नतो बुधः समुद्वर्तक
सुक्षाल्य कोष्णेन वारिणा भूयोप्यभ्यंजयेत्तेन पंचगव्येन शंक
नतः स्नाप्य शिवं भक्त्या कर्पूरागरुचंदनैः ६ पूजयेत्कुसुमैः

(13A)

(१५)

मा तिप्य च चंदनैः सौवर्णी कमलं कार्यं पंचत्रिंशद्दशां गुलं सरलं विन्य
र्णिके सराढ्यं सकर्णिकं वस्त्रयुग्मं तथा श्वेतं सूक्ष्मं द घा सुशोभनं
बोधयेद्दीपान्ततः षट्त्रिंशत्संख्यया रौप्यता म्रादिपात्रस्थैर्नी
नुकारयेत् ततो भूत वलिं दद्यात्सर्वदिक्षु प्रयत्नतः पूजां
ये द्विप्रान श्रोदद्यां छदक्षिणां ततो वेद्यां वितानं च चतुरस्रं
येत् तत्रैवाग्निं समाधाय श्रीं [illegible] पमद्बुधः स्थालीपा
द्धी संयावकं च सपायसं तैर्बाहुत्योः दत्वा एभिरौद्रबलिं त
२ हरेत्सर्वा सुकाष्ठा सुमंत्रेण विधिपूर्वकं सार्धं वत्सतरी भिश्च
षेण वे पुनः अभिषिच्य द्रपतं तु विधिदिष्टेन कर्मणा
तासितैः कुंभैः पुष्पैश्चापि विभूषयेत् संयुक्तं वस्त्रयुग्माभ्यां ॥१३॥
दुर्यसंभवे तावन्यामपि संभवेसंयुक्तं कुर्यादिति शेषः ॥

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com